International Journal of Multidisciplinary Advanced Research Trends(IJMART)
A Peer Reviewed (Referred) International Jounral
http://ijmart.in/
Email: editor.ijmart@gmail.com
ISSN : 2349-7408

Vol. V, Issue 2(2)
(November - 2018)

RESEARCH ARTCLE

# मनुस्मृतौ प्रतिपादितसामाजिकांशाः
## (SOCIAL ASPECTS DESCRIBED IN MANUSMRUTHI)

**BANDI CHAITANYA KUMAR**
Research Scholar in Sanskrit
ACHARYA NAGARJUNA UNIVERSITY, NAGARJUNA NAGAR, GUNTUR



**B. CHAITANYA KUMAR**

सर्वप्राणिषु मनुष्यजन्म दुर्लभमिति प्रसिद्धमेव । धर्मार्थकाममोक्षरूपपुरुषार्थाः मानवस्य जीवनं सप्तथगमने स्थापयन्ति। तेषु धर्मोत्तरः स्यादिति स्मृतिः । भारतीयविश्वासमनुसृत्य मनुस्मृतिरत्यन्तं प्राचीनः । श्रूयते धर्मः अनया इति श्रुतिः । श्रुतिः वेदः आम्नायः इत्यादयः पर्यायशब्दाः । जगदुत्पत्तिः, संस्काराः, व्रतचर्या, स्नानविधिः, विवाप्रकाराः, विवाहकालः इत्येते पञ्चमहायज्ञाः, जीवनवृत्तिः, भक्ष्याऽभक्ष्यविवेकः, द्रव्यशुद्धिप्रकारः, राजधर्माः, दायविभागः , मोक्षधर्माः, नैकारोग्यविषयाः, प्रायश्चित्तविषयाः, कुलाचाराः, पाषण्डधर्माश्च धर्मशास्त्रेषु प्रतिपादिताः ।

प्राचीनकाले कुलव्यवस्था बलवती वर्तते स्म । किन्तु न केवलं ब्राह्मणाः जन्मनैव पवित्राः, किन्तु यथा ते तेभ्यो हितं धर्ममनुसरन्ति ते एव ब्राह्मणाः इति तत्रैव स्पष्टमुक्तम् । प्रजारक्षणं तस्य परमो धर्मः । वणिक् व्यापारकरणे निपुणः । पशुरक्षणं, वर्तकं, कुसीदप्रदानमिति वैश्यधर्माः । एतेषां त्रयाणां शुश्रूषा शूद्रधर्मः । अष्टविधविवाहाः धर्मशास्त्रेषु सर्वत्र प्रदर्शिताः । 1)ब्रह्म 2)देव 3)आर्ष 4)प्रजापत्यं 5)गान्धर्व 6) राक्षस 7)आसुर 8)पैशाच इति । कन्याशुल्कं वराय धनप्रभावो वा तदानीं नासीत् । अपि च स्त्रीषु गौरवप्रतिपत्तिः तदानीं विशेषेण, स्त्रीणां सत्काराय बहवो विषयाः च प्रतिपादिताः ।

**प्रस्तावना-**

सर्वप्राणिषु मनुष्यजन्म दुर्लभमिति प्रसिद्धमेव । यतः एवं विधाः जीवनव्यवहाराः अन्यत्र न दृश्यते । धर्मार्थकाममोक्षरूपपुरुषार्थाः मानवस्य जीवनं सप्तथगमने स्थापयन्ति। तेषु मोक्षः कैश्चिदेवलभ्यः । धर्मार्थकामानां त्रिवर्ग इति व्यवहारः । तेष्वपि धर्मः सर्वोत्तमः । त्रयोऽपि पुरुषार्थाः धर्माश्रिता एव कार्याः । यथा धर्मपूर्वकोऽर्थः, धर्मयुक्तकामः, धर्मेण संपाद्यो धर्मः इति

International Journal of Multidisciplinary Advanced Research Trends(IJMART)
A Peer Reviewed (Referred) International Jounral
http://ijmart.in/
Email: editor.ijmart@gmail.com
ISSN : 2349-7408

Vol. V, Issue 2(2)
(November - 2018)

नियमो धार्मिकेषु वर्तते । तेषु धर्मोत्तरः

धारणात् धर्म इति धर्मशब्दार्थः स्मृतिकारैः निरूपितः । येनाचरितेन लोके धार्यते स धर्मः । हृदयेनाऽभ्यज्ञातो वेदप्रमाणकः श्रेयस्साधनहेतुः धर्म इति निष्कृष्टं

स्यादिति स्मृतिः ।

धर्मलक्षणं स्मृतिषु दृश्यते । चोदनालक्षणेऽर्थे धर्मः । अनिष्टवृत्तये इष्टप्राप्तये च यो मनुष्यं चोदयति स धर्म इति प्रोच्यते प्राज्ञैः –

**विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः ।**
**हृदयेनाभ्युनुज्ञातो यो धर्मस्तं निबोधत ।।** मनुस्मृतिः - अध्यायः-2,श्लोकः-1

भारतीयविश्वासमनुसृत्य मनुस्मृतिरत्यन्तं प्राचीनः । तस्य कालो निश्चेतुं न शक्यते । अतो मनुस्मृतिः ततः प्राचीनान् गौतमधर्मसूत्रे आचार्याः इत्यादि नामभिः पूर्ववर्तिनः स्मृतिकाराणपि उदाहृतवती । चतुष्पञ्चाशत् स्मृतिग्रन्थाः

**शृतिः स्त्री वेद आम्नायः त्रयी धर्मस्तु तद्विधिः** इत्यमरः । श्रूयते धर्मः अनया इति श्रुतिः । श्रुतिः वेदः आम्नायः इत्यादयः पर्यायशब्दाः । अतो वेदेन भोज्यमानः अर्थः धर्मः इति प्रसिद्धः । वेदमधीत्यापि तेन किं बोधितं, मया किं बुद्धमिति ज्ञातुं कोऽपि न शक्नोति । अतो

लभ्यन्ते । मनु, नारदीय, अत्रि, अत्रिसंहिता, विष्णु, संवर्त, दक्ष, अङ्गिरस, शातातप, गौतम, आश्वालायन, इन्द्रदत्त, उपकश्यप इत्यादि बहवः स्मृतिग्रन्थाः मुद्रिताः लभ्यन्ते ।

वेददर्शिभिर्महर्षिभिः ये धर्माः आचरिताः तान् स्मृत्वा महर्षयः कतिचन नियमान्, सन्दृश्य रचयामासुः । अतस्तेषां धर्मशास्त्रबोधकग्रन्थरूपेण आविष्कृतम् । ततो धर्मशास्त्रग्रन्थां स्मृतिरिति व्यवहारः सिद्धः ।

जगदुत्पत्तिः, संस्काराः, व्रतचर्या, स्नानविधिः, विवाप्रकाराः, विवाहकालः

इत्येते पञ्चमहायज्ञाः, जीवनवृत्तिः, भक्ष्याऽभक्ष्यविवेकः, द्रव्यशुद्धिप्रकारः, राजधर्माः, दायविभागः , मोक्षधर्माः, नैकारोग्यविषयाः, प्रायश्चित्तविषयाः, कुलाचाराः, पाषण्डधर्माश्च धर्मशास्त्रेषु प्रतिपादिताः । विशेषतः मनुस्मृतौ एते धर्माः द्वादशसु अध्यायेषु पञ्चदशशताधिकैः श्लोकैः प्रतिपादितः ।

## मनुस्मृतौ प्रतिपादिताः सामाजिकांशाः

सप्तत्रिंशद्विभागरूपे धर्मशास्त्रे मुख्याः अद्यापि अनुसरणीयाः धर्माः उक्ताः । तेषां मुख्यानां संक्षेपः अत्र निरूप्यते । वर्णो नाम कुलम् । प्राचीनकाले कुलव्यवस्था बलवती वर्तते स्म । विराट् पुरुषस्य शिरसः उत्पन्नत्वात्, लोकस्थितिहेतूनां वेदानां धारणाच्च ब्राह्मणे धर्मस्य प्रवृत्तिः तथा विश्वासश्चासीदिति मनुस्मृतौ निरूपितः । किन्तु न केवलं ब्राह्मणाः जन्मनैव पवित्राः, किन्तु यथा ते तेभ्यो हितं धर्ममनुसरन्ति ते एव ब्राह्मणाः इति तत्रैव स्पष्टमुक्तम् । अतो वर्णेषु न्यूनाधिकविवक्षा न कृता इत्यपि द्रष्टव्यम् –

**उत्तमाङ्गोद्भवाज्जोष्ठाद् ब्राह्मणश्चैव धारणात् ।**
**सर्वस्यैवास्य सर्गस्य धर्मतो ब्राह्मणः प्रभुः ॥**
**ब्राह्मणेषु च विद्वाशो विद्वत्सु कृतबुद्धयः ।**
**कृतबुद्धिषु कर्तारः कर्तृषु ब्रह्मवेदिनः ॥** मनुस्मृतिः-अध्यायः-1, श्लोकः-97

ब्राह्मणानन्तरं द्वितीयः क्षत्रियः । प्रजारक्षणं तस्य परमो धर्मः । क्षतात् – आपदः त्रायते इति क्षत्रः । क्षत्रात् भवः क्षत्रियः इति व्युत्पत्तिरपि क्षत्रियशब्दस्य कविभिर्दर्शितम् । **क्षतात् किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः ।** वणिक् व्यापारकरणे निपुणः । पशुरक्षणं, वर्तकं, कुसीदप्रदानमिति वैश्यधर्माः । एतेषां त्रयाणां शुश्रूषा शूद्रधर्मः । तत् शुश्रूषाशब्देन तेषां योगक्षेमनिर्वहणं शूद्रादीनामिति व्याख्यासु दर्शितम् । अतः

न कश्चित् अधिकः, अल्पः इति विवक्षा वर्णविभागे न दृष्टा।

**अध्यापनमध्ययनं यजनं याजनं तथा।**
**दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत् ।।**
**प्रजानां रक्षणं दानमिज्याऽध्ययनमेव च।**
**विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः ।।**
**पशूनां रक्षणं दानमिज्याध्ययनमेव च।**
**वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव च ।।**
**एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत्।**
**एतेषामेव वर्णानां शुश्रूषामनसूयया ।।** मनुस्मृतिः-अध्यायः-1, श्लो-88तः91

वर्णधर्मेषु षट्ककर्माणि प्रसिद्धानि । ब्राह्मणक्षत्रियवैश्यानां वेदाध्ययने अधिकारो विहितः । उपनयनानन्तरं वेदाध्ययनं क्रियते । उपनयनात् प्राक् शौचादिविधिषु नियमः न भवति । अतः उपनयनानन्तरं द्वितीयं जन्म भवति । अतस्ते द्विजाः इति उच्यन्ते । वेदानामध्ययने त्रैवर्णिकानामप्यधिकारः अस्ति । ब्राह्मणो वृत्त्यन्तरं विहाय वेदाध्ययने तदानीं प्रवर्तते स्म । अतस्तस्यैवाध्यापनेऽधिकारो विहितः । यजनं स्वयं यज्ञादिकर्मकरणम् । अवृत्तिको ब्राह्मणो वेदकर्मभिः जीवनं नयेदिति यजनेऽपि तस्याधिकारः । एवं दानं योग्याय यथोक्तद्रव्यादिप्रतिपादनम्, आदानं प्रतिग्रहः । षट्सु कर्मस्वधिकारे विहितेऽपि गत्यन्तराभावे एव ब्राह्मणोऽपि याजनाध्यापनप्रतिग्रहान् कुर्यादिति स्मृत्यन्तरे स्पष्टम्।

उपनयनकालः त्रैवर्णिकानां भिन्नतया दर्शितः । ततो वेदाध्ययनं गुरुकुलवासमाश्रित्य कुर्यात् । ब्रह्मचयर्याश्रमे गुरावधीनः भैक्ष्येण जीवन्, द्वादश वर्षाणि एकवेदे ब्रह्मचर्यं चरेत् । ततो गुरुणाऽनुज्ञातो गुरुदक्षिणां तेनैवोक्तं दत्त्वा, ततः परिणीतो भवेत् । परिणयादारभ्य गृहस्थाश्रमस्थो भवति । मनुष्यः शतायुरिति मत्वा प्रथमं चतुर्थं भावं ब्रह्मचर्यं चरेत् । ततः आश्रमविकल्पः । गृहस्थाश्रमे एव शेषजीवनं नयेदित्यर्थः । ब्रह्मचर्याश्रमेऽपि वेदाध्ययनं कुर्वन् यथावसरं कालं नयेत् । ततो गृहस्थाश्रमं प्रविशेत् ।

अष्टविधविवाहाः धर्मशास्त्रेषु सर्वत्र प्रदर्शिताः । 1)ब्रह्म 2)देव 3)आर्ष 4)प्रजापत्यं 5)गान्धर्व 6) राक्षस 7)आसुर 8)पैशाच इति । एतेषु प्रथमे चत्वारः उत्तमाः । यदद्य विवाहविधौ धनव्ययश्च कन्यादात्रा अनुभूयते तादृशः प्राचीनकाले नासीत् । केवलं वारिधारापूर्वकं कन्याप्रदानं क्रियते स्म । ततः अग्निप्रदक्षिणेनैव विवाहः समाप्यते ।

## स्त्रीषु गौरवम् –

कन्याशुल्कं वराय धनप्रभावो वा तदानीं नासीत् । अपि च स्त्रीषु गौरवप्रतिपत्तिः तदानीं विशेषेण नासीत् । स्त्रीणां सत्काराय बहवो विषयाः प्रतिपादिताः । सामाजिकविषये मुख्यतम इति श्लोकाः निरूप्यन्ते –

**पितृभिर्भ्रातृभिश्चैताः पतिभिर्देवरैस्तथा ।**
**पूज्या भूषियितव्याश्च बहुकल्याणमीप्सुभिः ।।** मनुस्मृतिः, अध्यायः -3, श्लोकः-55

न केवलं विवाहकाले वरेण दत्तं धनं समर्पणीयं, किन्तु तदुत्तरकालमपि पित्रादिभिरप्येता भोजनादिना पूजयितव्यश्च बहुधनादिसम्पदं प्राप्तुकामैः –

**यत्र नार्यस्तु पूज्यन्ते समन्ते तत्र देवताः ।**

**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ।।** मनुस्मृतिः, अध्यायः -3, श्लोकः-56

यत्र कुले पुत्रादिभिः स्त्रियः पूज्यन्ते, तत्र देवताः प्रसीदन्ति । यत्र पुनरेता न पूज्यन्ते, तत्र देवताप्रसादाभावाद्यागादिक्रियाः सर्वा निष्फला भवन्तीति निन्दार्थवादः –

**तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः ।**

**भूतिकामैर्नरैर्नित्यं सत्कोरेषूत्सवेषु च ।।** मनुस्मृतिः, अध्यायः -3, श्लोकः-58

यस्मादेवं तस्मात्कारणादेता भूषणाच्छादनासनैर्नित्यं सत्कारेषु कौमुद्यादिषूत्सवेषु, उपनयनादिषु, आभ्युदयिकेषु समृद्धिकामैर्नृभिः सदा पूजनीयाः ।

एवमाधुनिकधर्मानुकूलाः समाजोपयोगिनश्च बहवो सामाजिकविषयाः मनुस्मृतौ प्रतिपादिताः । तेषामध्ययनेन, आचरणेन च नैकफलदायकं भवतीति कथने नातिशयोक्तिरिति शम् ।

**उपयुक्तग्रन्थसूची-**

1.मनुस्मृतिः – चौखम्बा विद्याभवन्, वाराणसी – 1970

2.गौतमधर्मसूत्राणि – आनन्दाश्रममुद्रणालयः, पूना – 1931

3.कालिदासः – रघुवंशमहाकाव्यम् – कृष्णदास अकाडमी, वाराणसी – 1983